International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(4): 36-38
© 2018 IJSR
www.anantaajournal.com
Received: 10-05-2018
Accepted: 11-06-2018

**नरसिंहभट्टः**
शोधच्छात्रः कर्नाटक-संस्कृत-
विश्वविद्यालयः बेङ्गलूरु,
कर्नाटक, भारत

**Correspondence**
**नरसिंहभट्टः**
शोधच्छात्रः कर्नाटक-संस्कृत-
विश्वविद्यालयः बेङ्गलूरु,
कर्नाटक, भारत

# सम्भाषणं-वर्णनञ्चेति काव्येषु भागद्वयम्

**नरसिंहभट्टः**

काव्यानि दृश्यश्रव्यत्वभेदेनद्विविधानीति शास्त्रेषु प्रथितम्। तदुभयोः प्रकारयोरपि सम्भाषणं वर्णनञ्चेति भागद्वयमालोचकैः शक्यतेऽवलोकयितुम् इति विशेषोऽत्र विचार्यते। यद्यपि, दृश्यकाव्यं सम्भाषणप्रधानम्, श्रव्यकाव्यं वर्णनाप्रधानामिति सत्यमेवैतत्। सत्यप्येवं, दृश्यकाव्ये वर्णनायाः श्रव्यकाव्ये सम्भाषणस्य चानुप्रवेशः सर्वानुभवगोचर एव। दृश्यकाव्ये सम्भासम्भाषणस्य श्रव्यकाव्ये वर्णनायाश्च प्राधान्यं भवतीति न पुनर्वक्तव्यम्।

एवंविधो विभागः शास्त्रेषु कुत्रापि न विश्लेषितः। तथापि, सम्भाषणावर्णनरूपयोरनयोर्विभागयोः संरचने कवीनां कौशलस्य, सहृदयानामास्वादस्य च वैविध्यं हृदयेन प्रमीयते। संस्कृतेतरभाषासाहित्येषु आधुनिकेष्वप्वेवंविधो विभागः समालोक्यते। तथा हि- कथा इति नाम्ना प्रसिध्देषु साहित्यप्रकारेषु परस्परसम्भषणस्यावकाश अल्प एव। कादम्बरीति प्रथितेषु साहित्यप्रकारेषु परस्परसम्भाषणस्याधिकोऽवकाश इत्यत्रानुसंधेयम्।

साहित्येषु कवेर्लेखकस्य वा वचनं तन्निबध्दपात्रमुखोदीरितवचतञ्चेति वचनं द्विविधं भवति। यद्यपि, शास्त्रे-

“वस्तु वालङ्कृतिर्वापि द्विधार्थः सम्भवी स्वतः। कवेः पौढोक्तिसिध्दो वा तन्निवध्दस्य वेति षट्” [1] ॥

इति १स्वतः सम्भवी २ कविपौढोक्तिः ३ कविविबध्दप्रौढोक्तिः इति वचनस्य त्रैविध्यं न्यरूपि। स्वतः सन्भविवचनं कवितन्निबध्दवचनान्यतरद्भवतीति पूर्वोक्तयोरेव प्रभेदयोरन्तर्भावे प्रस्तुतप्रबन्धविवक्षितविषयस्य विरोधो नास्तीति मन्ये।

“काव्येषु नाटकं रम्यं” इति दृश्यकाव्यस्य श्रव्यकाव्यादपि रम्यत्वमुच्यते। काव्यप्रकाराणां विकासक्रमेऽपि दृश्यकाव्यप्रकारस्य विकासोऽर्वाचीन इति विमर्शका अभिप्रयन्ति। परस्परसम्भाषणप्रधानदृश्यकाव्यरचनं निपुणः कविरेव

करोतीति ब्रुवते। एतेन वर्णना प्रधानकाव्यादपि सम्भाषणस्वारस्यवत्काव्यमेव गरीय इत्युक्तं भवति। रामायण-महाभारतादिषु कविमार्गदर्शकेषु काव्येषु सम्भाषस्यैव वैपुल्यं समस्तीत्यत्र स्मर्तव्यम्। रघुवंशादिषु पञ्चामकाव्येषु सम्भाषणवर्णनयोरुभयोरपि समावेशश्चकास्ति। तत्रापि कालिदासस्य रघुवंशकुमारसम्भवयोर्भारवेः किरातार्जुनीये च मनोहारि सम्भाषणप्रसङ्गानि संदृब्धानि। शिशुपालनैषधयोः सम्भाषणादपि वर्णनायाः प्राधान्यं दृश्यते।

वर्णनाप्रधानं पद्यं यथा-

मध्येन सा वेदिविलग्नमध्या वलित्रयं चारु बभार बाला। आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम्" [2] ॥

इदं कुमारसम्भवे पार्वतीवर्णनपद्येष्वन्यतमम्। इह पार्वत्या मध्ये विद्यमानं वलित्रयं वर्ण्यते। वलित्रयं नवयौवनेन कामस्यारोहणार्थं निर्मितं सोपानमित्युत्प्रेक्ष्यते। वचनमिदं कविरेव स्वयं वक्ति। न हि पात्रेण वाचयति। अत इदं कविप्रौढोक्तिः। पुनश्चात्र वर्णनमात्रमुपलभ्यते। एतादृशानि पद्यानि वर्णनाप्रधानानीत्युक्ते न स्याद्विप्रतिपत्तिरिति मन्ये।
सम्भाषणप्रधानं पद्यं यथा-

"उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम्। अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरन्ति महात्मनाम्" [3] ॥

कुमारसम्भवस्य पञ्चमसर्गे ब्राम्हणच्छद्मना तपस्यन्तीं पार्वतीमुपेत्य तत्परीक्षणायेश्वरनिन्दां कुर्वन्तमीश्वरं प्रति पार्वत्याः प्रतिवचनमिदंम्। हरस्य परमार्थं त्वं न वेत्सि। अत एवमीश्वरनिन्दापरं वचनं माम् प्रति वदसि। लोकविलक्षणं दुरवबोधकारणञ्च महात्मनां चरितं मन्दा द्विषन्ति इति पार्वती वचनस्य भावार्थः।
अत्र "यत एवमात्थ माम्" इत्यत्र "माम्" इति पदेन हरप्राप्त्यर्थं कठिणे तपसि मग्नां तद्विषयेऽचलमनस्कां "माम्" ईदृशनिन्दावचोभिश्चालयितुम- शक्यां प्रति त्वदुक्तिर्व्यर्था इत्यर्थं व्यनक्ति।

द्विषन्ति मन्दाश्चरितं महात्मनाम्" इत्यत्र "मन्दाः" इति पदेन शिवद्वेषिणः मन्दाः, त्वमपि शिवद्वेषान्मदोऽसीति परोक्षभर्त्सनं ध्वन्यते।

अमूर्तानां भावानामभिव्यक्तिर्वचोद्वारैव भवति। मानवभावानां वैचित्र्यञ्च वक्तृ-बोध्दव्यादिभेदेनानन्ततां याति। अतो वचःप्रधानपद्यरचनं नाम भावानाममूर्तानां वर्णनमिति वेद्यते। गिरि-दुर्ग-वृक्ष-झरि-नद्यादिमूर्तपदार्थानां वर्णनादपि एतेषाममूर्तानां भावानां तत्तद्भावाभिव्यञ्जनदक्षवचोविन्यासाहाय्ये- न काव्यसंरचनं परिपक्वप्रतिभाया द्योतकः। अत एव वचोविन्यासप्रधानं नाटकं काव्येषु रम्यमिति परिगण्यते।

कुमारसम्भवे तृतीयसर्गे इन्द्रं प्रति मन्मथस्येदं वचनं परिशील्यताम्-

"असंमतः कस्तव मुक्तिमार्गं पुनर्भवक्लेशभयात्प्रपन्नः। बध्दश्चिरं तिष्ठतु सुन्दरीणामारेचितभ्रूचतुरैः कटाक्षैः" ॥

"मुक्तिमार्गः प्रपन्नं कं सुन्दरीणां कटाक्षैश्चिरबध्दं करोमीति मन्मथस्य वचसा मुक्तिमार्गे गच्छन्तमपि पुरुषं इन्द्रस्यासम्मतं मार्गभ्रष्टं कर्तुं प्रवृत्तो भवति इति विघ्नः। इन्द्रे एतादृशप्रवृत्तिः कदापि न दृषृश्चेन्मन्मथस्तत्पुरतः एवंविधं वचः निश्शङ्कं वक्तुं न प्रभवति। एतेन वचसा इन्द्रमन्मथयोर्मैत्र्याः दार्ढं, तयोः स्वभावः, मन्मथस्याहङ्कारः एवमनेकेऽर्थो ध्वन्यन्ते।
क्वचित् काव्येषु अभिप्रायभेदाः सम्भाषणद्वारैव मनोज्ञतया प्रतिपाद्यन्ते। किरातार्जुनीये द्वितीयसर्गे द्रौपदीभीमौ पौरुषमेव प्रधानमिति सयुक्तिकं पतिपादयन्ति। धर्मराजस्तु शत्रोर्दुर्योधनस्य विषये सामोपायप्रयोगं भाषते। एवं शिशुपालवधकाव्ये शिशुपालवधयुधिष्ठिरकर्तृकराजसूययागयोरुभयोः

समकाले प्राप्ते तयोः कतरदिदानीं साम्प्रतमिति विचारे श्रीकृष्णेन बलरामोद्धवयोः पुरस्तात्प्रस्ताविते, बलरामः दण्डनितेः प्राधान्यं प्रतिपाद्य शिशुपालवध एव सम्प्रति स्थाने इति वक्ति। उध्दवस्तु, सामप्रधान वचांसि ब्रूते। एवं कुमारसम्भवे, विप्ररूपेण तपस्यन्तीं पार्वतीमुपेत्य शिवः शिवनिन्दां करोति। ततः पार्वती सयुक्तिकववचोभिः शिवस्य सर्वमङ्गलत्वं स्थापयति।

तथा, ऋषीणां सत्कारसन्दर्भे राज्ञां वचांसि रघुवंशे किरातार्जुनीये च यान्युपलभ्यन्ते तैः ऋषीणां गौरवपात्रत्वं, राज्ञाञ्च तद्गौरदानसंस्कारवत्वं ज्ञाप्यते। तथा हि- रघुवंशे विश्वजिद्यागे कोशजातं सर्वमपि दाने व्ययीकृतं रघुं कौत्सनामको वरतन्तुशिष्यः गुरुदक्षिणायै वरं याचितुपुपगच्छति। तदा कौत्सं प्रति रघोर्वचः ऋषीणां प्रति राज्ञां गौरवं कीदृशमासिदिति द्योतयति। यथा-

“तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे। अप्याज्ञया शासितुरात्मना वा प्राप्तोऽसि सम्भावयितुं वनान्मां” ॥

तवागमनमात्रेण मे मनो न तुष्यति। तवाज्ञापलनेनैव मनस्तृप्यते। अतो मां आज्ञापयत्विति वचः तपस्विनां प्रति रघोः स्वसमर्पणंमभिव्यज्यते। एवं किरातार्जुनीये समागतं व्यासमुनिं प्रति युधिष्ठिवचांस्यपि ऋषीणां प्रति राज्ञां गौरवदर्शकानि। यथा-

> “अद्यक्रियाः कामदुघा क्रतूनां सत्याशिषः सम्प्रति भूमिदेवाः। आसंसृतेरस्मि जगत्सु जातस्त्वय्यागते यद्बहुमानपात्रम्” ॥

अत्र व्यासस्यागमनेन सर्वं सफलं जातमिति युधिष्ठिरवचनं मुनिं प्रति तस्यादरं व्यनक्ति।

उपसंहारः

काव्येषु सम्भषणभागः वर्णनाभागश्चेति भागद्वयं शक्यते परिगणयितुम्। तत्र वर्णनाभागे नदि-गिरि-वन-जलपातादिमूर्तानां पदार्थानां वर्णनं भवति। सन्भाषणभागे त्वमूर्तानां भावानां मनोगतानां तत्तद्भावानुकूलववचोविन्यासेन अभिव्यक्तिः क्रियते। नदी-पर्वतादिमूर्तपदार्थवर्णनादपि पात्राणां वचोभिस्तद्गतभावाभिव्यञ्जनस्यैव रसपोषकत्वात् काव्येषु गरिष्ठं स्थानं परिगण्यते।

**सन्दर्भ ग्रन्थ सूची**


1. साहित्यदर्पण-३-७
2. कुमारसम्भव-१-३९
3. कुमारसम्भव८-५४